श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्री मुरलीपञ्चाशत् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

---

*The printed source of this stotra (Śrīnidhigranthamālā, Rāṣṭrīyasaṃkṛtavidyāpīṭham, pp. 202–210) contains some typographical errors. A best attempt has been made to correct them.*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री मुरलीपञ्चाशत् ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

## अथ प्रथममभिधानप्रकरणम्

मुकुन्दरसनालीला त्वयि काचन काशते।
मुरलीति ततो नाम नाम ते साधु वर्तते॥ 1 ॥

मुनयो रसिका लीना
    मुग्धा रसरीतिपक्षपाताच्च।
सर्वा मुखरा लीना
    मुरली त्वं तेन कीर्तिता जगति॥ 2 ॥

मुररिपो रदनाम्बरलीलया
    मुरलि ! हे ! मुरलीति निगद्यसे।
मुमुहुरम्ब ! तव स्वरमाधुरी -
    वशगतास्तत एव हि गोपिकाः॥ 3 ॥

आद्यं भागं नामधेये त्वदीये
    प्राहुः प्राज्ञा आमृतं बीजमन्त्यम्।
क्षेम्यं तेन त्वां मुखे सन्निवेश्य
    श्रीमान् कृष्णस्साम्प्रतं गायतीति॥ 4 ॥

ओष्ठान्तस्स्था रमयसि विभुं लीयते त्वय्यसौ च
    तस्मात् सा त्वं भवसि मुरली साम्प्रतं तन्नितान्तम्।

ओष्ठ्यं पूर्वं भवति वदने ते सुवर्णं तदेतत्
रेफोऽन्तस्स्थस्तदनु तदनु प्रेक्षितं लीति वर्णम् ॥ 5 ॥

मुरारिसंलालितगात्रयष्टिः
मुराल्यथेयं मुरली कथं वा ?।
मुराल्यभिख्या मुरनर्महेतुः
तनोति वक्तुं मुरलीत्यभिख्याम् ॥ 6 ॥

श्रुतित्रयी या जगति प्रसिद्धा
वर्णत्रयीमत्र पुनाति सेयम्।
वर्णत्रयी ते मुरलीति सेयं
श्रुतीरनेकाः परितः पुनाति ॥ 7 ॥

रलयोरभिदेति यः प्रवादः
विबुधानां किल यः स एष जातः।
मुररीतिरुदेष यन्मुरारिः
मुरलीति प्रमुदं पुनर्विधत्ते ॥ 8 ॥

मुग्धा रमा लीनमना जनानां
समक्षतः पातुमथेतरस्य।
बिम्बाधरं नाम परं विदग्धा
मुरल्यभूत् स्पष्टमिदं बुधानाम् ॥ 9 ॥

मुग्धा रस्या लीला जाताः
गोपस्त्रीणां नादाद्यस्याः।
नाम्ना सैवं जाता मह्यां
सत्यं सत्यं नान्या रीतिः ॥ 10 ॥

मुखरदनाम्बरलीला
मुरसुररिपुवैरिपाणिलीनायाः।

मुरली "मुरली" संज्ञां
    मुखरयति स्पष्टवर्णसङ्कलिताम् ॥ 11 ॥

मुदा रस्या लीलाः कलयति भवत्या मुररिपुः
    मुखाम्भोजे माता ! रदनवसने लीनवपुषा।
तथा मुग्धाक्षीणां जनयति रते रीतिमपि या
    ततः सा सर्वोक्ता भवति मुरलीत्येव भवती ॥ 12 ॥

मुनयोऽपि रसेन लीनभावाः
    मुरहन्तुर्मुखसङ्गमे तव।
मुरलीति ततो हि कीर्तिता त्वं
    मुदमस्मासु कुरुष्व सन्ततम् ॥ 13 ॥

## अथ द्वितीयं चमत्कृतिप्रकरणम्

एकेन चक्रमितरेण करेण शङ्खं
    सोऽयं वहन् यदुपतिर्भवतीं कराभ्याम्।
बिम्बाधरेऽतिमधुरे विनिवेश्य मातः !
    संलालयन् मुरलि ! सौति मुदं जनानाम् ॥ 14 ॥

मधुरा मुरली नितरां
    मधुरानगरीभवस्य परमस्य।
मधुराधाराधरगा
    मधुरं स्वरं परं प्रसौति ॥ 15 ॥

कृष्णे गायति तृष्णया परमया यातेषु सर्पेष्वधो
    भर्गे केवलविग्रहे गिरिसुता निर्भीतिरालिङ्ग्य तम्।
मातर्मे मुरलीति हे जय जयेत्येवं वदन्ती मुहुः
    प्रीत्या नृत्यति यत् समीक्ष्य नटराड् लज्जां पुनर्विन्दति ॥ 16 ॥

रन्ध्रेण वंशो यदि संयुतस्स्यात्
अधः पतेद्रन्ध्रगणैस्समेतः।
आरूढकृष्णाननपङ्कजोऽयं
कृष्णाश्रयाणां गतिरुन्नतैव॥ **17**॥

कृष्णाननामोदभुजो मुरल्याः
पुष्णाति गानं यमुनावनानि।
उष्णानि पापानि परं कृतानि
मुष्णाति चास्मन्मनसाऽमितानि॥ **18**॥

ख्यातः पञ्चजनाख्यदानवभवः श्रीपाञ्चजन्यः पुनः
वक्त्राब्जे विनिवेश्य कम्पयति यं शत्रून् रणायागतान्।
तद्वत्त्वां मुरलीं मुरासुरभवां मन्येऽथ मान्यां ततः
वक्त्राब्जे विनिवेश्य मोहयति यद्गीतेन सर्वानपि॥ **19**॥

शङ्खः पुमानतिगभीरभयङ्करेण
शब्देन यं मुखरयत्यजितस्स एव।
त्वां तु स्त्रियं मुरलि ! तेन मुखे निवेश्य
संलालयन् जयति शीधुसुधारसेन॥ **20**॥

शङ्खः शरण्यस्य परो नु वंशः
वंशो हि को वा विशयावकाशः ?।
शङ्खं स्वकीये वदने विधाय
सोऽन्त्येन वंशस्य तनोति शब्दम्॥ **21**॥

पञ्चजनासुरहननात्
भवति यथा पाञ्चजन्यवानीशः।
मुरसुररिपुनाशात् किं
मुरलि ! त्वद्वान् तथा सोऽयम्॥ **22**॥

केनार्थेन नराकृतिर्भुजगराड् जातो बलस्तेऽग्रजः
ज्ञातं ज्ञातमिदं तु वंशवदने त्वय्यत्र जाते वने।
गानं सुन्दरतां तनोश्च युगपत् कर्णेन पातुं दृशा
नो चेदेष दृशा शृणोति न तदा पश्यत्यनन्तो यदि॥ 23॥

मुकुन्दवदनाम्बुजे मुरलि ! वर्तसे सादरं
तदीयकरलालिता तदधरं धयन्ती मुदा।
सृजस्यपि च तेन तं मदनमम्ब ! विद्मो वयं
पयोनिधिगणावृतामभिनवां कृशाङ्गीं रमाम्॥ 24॥

श्रीकृष्णचूताधरपल्लवादः
श्रीकृष्णलोलेक्षणकृष्णदेहः।
श्रीकृष्णदेहेन भृतः परेण
श्रीकृष्णवंशः पिक एव कोऽपि॥ 25॥

सद्वंशप्रभवा पिबस्ययि परं पुंसः परस्याधरं
पश्यत्स्वेव समेषु कूजसितरां तारं च रागोत्तरम्।
येनायं विवशस्समोऽपि च जनः पुण्यां पवित्रां सतीं
हृद्यां मङ्गलदामवद्यरहितामास्ते प्रशंसन् सदा॥ 26॥

"उरसि विनिहिताहं साऽसि मत्तः प्रिया त्वं
मदुपरि निहिता यद्वंशि ! वक्त्रारविन्दे"।
"नहि नहि, निहिताऽहं साऽधरे देश एव
अभव"मिति तव लक्ष्म्या वाक्यतस्साधुवाक्यम्॥ 27॥

पुररिपुतरुणी यथाऽनुभुङ्क्ते
भुजगजभयदूरगा स्वकान्तम्।
भुजगकुलपनिर्वृतिप्रदा सा
मुररिपुमुरली मुदं विधत्ताम्॥ 28॥

मुनिः कलहकौतुकी भुवि निधाय वीणां निजाम्
अहो ! बत ! किमेतदित्यतितरां शिरः कम्पयन्।
मुदश्रु विनिपातयन् करतलेन तालान्वितः
क्रमेण विवशान्तरो मुरलि ! मूढतां विन्दति॥ **29** ॥

"स्वामिन् ! नारद !" "वंशहस्त ! किमिदं ?" "स्वामिन्नुपेन्द्रोऽस्म्यहं
रेखाकर्मकृते मया खलु लघुर्दण्डः परं धार्यते"।
"मैवं वञ्चय मां"* "नतं क्व महती" "भग्ना हि सा" "केन वा ?"
"वंशेनैव तवे"त्युपेन्द्रविधिभूमुन्योरभूतां गिरौ॥ **30** ॥

कान्तिः काचन कानने भगवतः कृष्णस्य या विस्तृता
सा नीलाम्बुधिसन्निभा विजयते यस्यां यदास्याम्बुजे।
संसक्ता भवती विभाति मुरली सत्यं सरोजासना
सत्यं सागरसम्भवा च सततं सूतेऽथ नस्सम्पदम्॥ **31** ॥

अधरमधु पिबेयं केवलं लीलयाहं
भगवति ! परयेति प्राप्तवंशीतनुस्त्वम्।
भगवति कमलस्थे ! नाथहस्ताननाख्ये
स्थितिमिति कमले ! त्वं प्राप्य भासीति मन्ये॥ **32** ॥

मुरलीधरोऽद्य धरणीधरः पुरा
पुरुषोत्तमोऽथ धरणी मुरल्यभूत्।
रदनोद्धृता हि रदनच्छदामृतं
परिपातुमेव पुनरेवमाकृतिः॥ **33** ॥

मुरली द्वारवती त्वं
मधुरा गीतेन तेन कृष्णोऽयम्।
उभयीं नगरीं धत्ते
युगपद्युक्तं हि पाणियुगलेन॥ **34** ॥

द्वारवतीनाथोऽयं
    मधुरानाथश्च वासुदेवो यत्।
स्थानेन द्वारवतीं
    मधुरां गीत्या च लालयत्येवम्॥ **35**॥

विशुद्धवर्णा नखरश्मिजालैः
    कृष्णा कटाक्षैरधरेण रक्ता।
मुरल्यतस्त्वं हि विशुद्धकृष्ण -
    रागं विधत्से स्वरतो जनानाम्॥ **36**॥

बिम्बोष्ठरागेण सरस्वती त्वं
    कटाक्षकान्त्या च कलिन्दजाता।
सुरस्रवन्ती नखरश्मिजालैः
    मातस्त्रिवेणीव मनः पुनासि॥ **37**॥

अम्ब ! द्वारवती त्वं
    द्वारवतीत्यत्र को नु सन्देहः ?।
मुद्रावृताङ्गुलीभिः
    वृता समुद्रावृतासि त्वम्॥ **38**॥

मुरलि ! तुलसी सा त्वं सत्यं धृता हरिणा करे
    भवसि ललिता कान्त्या कृष्णा तदङ्गसमुत्थया।
अथ च निहिता बिम्बोष्ठान्तस्समीपपदे नसः
    किमिति मधुरा भोक्तुं घ्रातुं पुनःपुनरीक्षितुम्॥ **39**॥

स्वतस्सुवर्णामधराभया च
    कटाक्षकान्त्या च विचित्रवर्णाम्।
अवर्णगानां मुरलीं मुरारेः
    अवर्ण एवाहमिहास्मि वक्तुम्॥ **40**॥

## अथ तृतीयं सङ्कीर्णप्रकरणम्

मुमुहुरपि च देवा मुग्धबर्हावतंसे
मुनिजननुतपादे मुक्तगोबृन्दनन्द्ये।
मुरलि ! मुदितदेहन्यस्तहस्ताधरे ते
मुरभिदि मुचुकुन्दस्वान्तसन्तोषहेतौ ॥ **41** ॥

मुरलीतरलीकृतान्तरङ्गाः
सरला गोपमनोहरायताक्ष्यः।
सुरभूवनिताभिवन्दनीयाः
सरसार्द्रा विलसन्ति काननान्ते ॥ **42** ॥

गोपालः किल कोऽपि भूधरधरः श्रीदेवभूमीरुहः
वंशो नाम भवान् परः परभृतस्तस्याधरं पल्लवम्।
आस्वाद्यातिमनोहरं श्रमहरं सर्वोत्तरं सादरं
श्रुत्यानन्दकरं स्वरं सृजति यत्तत्रास्ति किं वाद्भुतम्? ॥ **43** ॥

उरसि रचितवासा भासते सारसाक्षी
सरसिजनिलया सा सर्वलोकेश्वरस्य।
मुरलि ! मुखसरोजे साऽधरं त्वं पिबन्ती
करकमलदलाभस्वङ्गुलीलालिताङ्गा ॥ **44** ॥

रचितसुकृतपुञ्जात् साऽसि वंशादुदीता
करकमलगृहीता कंसकालेन काले।
अधरममृतमाप्ता साम्प्रतं गायसि त्वं
प्रथमममृतमाप्ता साहमस्मीति सत्यम् ॥ **45** ॥

मुरली मुखसङ्गता मुरारेः
करपद्माङ्गुलिपत्रपञ्जरस्था।

अधराननकान्तिकर्बुराग्रा
    मधुरा काऽपि शुकी कलस्वरेयम् ॥ 46 ॥

वंशः कोऽप्यधरामृतं भगवतः कृष्णस्य भूयो धयन्
    मोदेनापि मदेन हन्त महता गानं विधत्ते वने।
येनेमा विवशा स्त्रियो व्रजभुवो मुञ्चन्ति गेहान् पतीन्
    हस्ताद्वस्तुगणं नवं नयनयोरानन्दबाष्पं परम् ॥ 47 ॥

वंशं करेऽप्यधरबिम्बफलेऽपि तन्वन्
    वंशं यदोर्व्रजभुवां च विभूषयन् सन्।
कंसं च मल्लमपि हन्त ! नयन् तमन्तं
    कं सम्मतं दिशतु सत्त्वगुणोत्तराणाम् ॥ 48 ॥

अधरमधु पिबन्ती माधवस्याम्ब ! सा त्वं
    मधुरमथ किरन्ती सुस्वरं रागपूर्णम्।
विवशमिव नयन्ती कर्णबृन्दं जनानां
    मुरलि ! किमपि हृद्यं क्रीडनं संविधत्से ॥ 49 ॥

मुरलि ! मुरहरास्ये मुग्धबिम्बोष्ठमध्ये
    किमपि मधु धयन्ती तच्च गेयं विधाय।
गहनगगनदेशे कृष्णकान्त्या समेत्य
    किरसि रसमुदारं कर्णपीयूषसारम् ॥ 50 ॥

अधरमधु धयन्तीमञ्जनाभस्य वंशीम्
    अमृतमिव दुहानामन्तरङ्गे श्रुतीनाम्।
अखिलमपि नयन्तीमस्वतन्त्रं जनौघम्
    अविरतमहमम्बामन्तरङ्गे करोमि ॥ 51 ॥

बिम्बोष्ठे विनिवेशितः करसरस्सञ्जातपत्राङ्गुली -
    जालैर्लालितविग्रहो बहुमुखैरास्वादयन् तद्रसम्।

श्रुत्यानन्दविधायिनीं मधुमयीं पङ्क्तिं स्वराणां सृजन्
वंशः केशिनिषूदनस्य दिशतु श्रेयांसि भूयांसि नः ॥ 52 ॥

वेणुर्गायति गोपनाथवदने कर्णामितानन्ददः
स्थाणुर्नृत्यति तत्र येन विजयो विख्यातिमान् वर्धते।
रेणुः पादतलात् प्रभो रसनया धेनोरयं पीयते
सोऽणुर्बाष्पजलं क्रमेण समभूदात्माऽपि भूयो मम ॥ 53 ॥

अधरमधिवसन्तीमम्बुजाक्षस्य शौरेः
अनुपमसुषमाभिर्लालितामङ्गुलीभिः।
अमृतमिव वमन्तीमन्तरङ्गे श्रुतीनाम्
अयि ! मुरलि ! सदा त्वां भावये भव्यमूर्तिम् ॥ 54 ॥

## अथ चतुर्थं फलप्रकरणम्

शाखानामुपरि स्थितो हि भगवान् तस्यासि सा त्वं मुखे
तत्रस्थाधरपल्लवामृतरसैः पुष्टा किरन्ती पिकी।
भक्तानां प्रियपञ्चमं किमपि, तच्चक्रे कविः श्रीनिधिः
पञ्चेमान् भवतीविलासमहितान् श्लोकान् पिकानामिति ॥ 55 ॥

॥ इति श्री मुरलीपञ्चाशत् समाप्ता ॥